॥ श्री महागणपतये नमः ॥
Indian Astrology Source
www.astrovidya.com

## अथ बुध मंत्रः

ओं अस्य श्री बुध महामंत्रस्य काश्यप ऋषिः। त्रिष्टुप् छंदः। बुधो देवता। बुध प्रसादसिद्ध्यर्थे जपे विनियोगः॥ (करन्यासः) बुधाय अंगुष्ठाभ्यां नमः। सौम्याय तर्जनीभ्यां नमः। सिंहारूढाय मध्यमाभ्यां नमः। चतुर्बाहवे अनामिकाभ्यां नमः। गदाधराय कनिष्ठिकाभ्यां नमः। सोमपुत्राय करतलकरपृष्ठाभ्यां नमः॥ (अंगन्यासः) बुधाय हृदयाय नमः। सौम्याय शिरसे स्वाहा। सिंहारूढाय शिखायै वषट्। चतुर्बाहवे कवचाय हुं। गदाधराय नेत्रत्रयाय वौषट्। सोमपुत्राय अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्भंधः॥ (ध्यानं) सिंहारूढं चतुर्बाहुं खड्गचर्म गदाधर। सौम्यपुत्र महासौम्यं ध्यायेत्सर्वार्थ सिद्धिदं॥ (लमित्यादि पंच पूजा) ओं लं पृथ्वितत्वात्मने गंधान्धारयामि। ओं हं आकाशतत्वात्मने पुष्पं समर्पयामि। ओं यं वायुतत्वात्मने धूपमाघ्रापयामि। ओं रं वह्नितत्वात्मने दीपन्दर्शयामि। ओं वं अमृततत्वात्मने अमृतनैवेद्यं समर्पयामि। सर्वतत्वात्मने सर्वोपचार पूजां समर्पयामि॥ उद्बुध्यस्वाग्ने प्रतिजागृह्येनमिष्टापूर्ते सग्ंसृजेथामयं च। पुनःकृण्वग्गस्त्वा पितरं युवानमन्वाताग्ं सीत्त्वयि तं तुमेतम्॥ इति बुध मंत्रः॥

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com